# मुख्यद्वारनिर्धारणम्

**प्रो.प्रभातकुमारमहापात्रः**
**ज्योतिषविभागाध्यक्षः, श्रीरणवीरपरिसरः, जम्मूः**

**Article Info**
Volume 4, Issue 3
Page Number : 277-287
**Publication Issue :**
May-June-2021
**Article History**
Accepted : 01 June 2021
Published : 15 June 2021

**शोधसारांशः-** द्वारस्थापनाय काः तिथयः शुभप्रदाः काः च अशुभप्रदा इत्यस्मिन् विषये यद्यपि रामाचार्यः न किमपि वक्ति किन्तु पीयूषधाराकारः गोविन्दः ज्योतिर्निबन्धोक्तमतम् एव उपस्थापयति तदनुसारेण पञ्चमी शुभदा भवति यतोहि इयं धनं यच्छति। एवमेव सप्तम्यां, नवम्याम् एवं अष्टम्यां च यदा द्वारस्थापनं विधियते चेत् इदं शुभफलप्रदं भवति इति गोविन्देन ज्योतिर्निबन्धोक्त मतम् उक्त्वा विस्तरेण द्वारस्थापनाय शुभाशुभ तिथीनाम् उल्लेखः कृतः।

**मुख्यशब्दाः-** शुभप्रदाः, गोविन्दः, मुख्यद्वारम्, ध्वजः सिंहः वृषः गजः।

**वर्णभेदेन द्वारदिङ्निर्णयः–**

**अथ द्वारं द्विजवैश्यशुद्रनृपराशीनां हितं पूर्वतः।1।।**

द्विजादिराशिमतां पुंसां क्रमेण पूर्वतः प्राच्यादि दिक्चतुष्टये द्वारं हितम्। यथा द्विजराशयः कर्कवृश्चिकमीनास्तेषां पूर्वदिशि, वैश्यराशयो वृषकन्यामकरास्तेषां दक्षिणदिशि, शूद्रराशयो मिथुनतुलाकुम्भास्तेषां पश्चिमदिशि, नृपराशयो मेषसिंहधनूंषि तेषाम् उत्तरदिशि द्वार निवेश इत्यर्थः।

**विश्वकर्मप्रकाशमतानुसारं –**

**कर्कटो वृश्चिको मीनो ब्राह्मणः परिकीर्तितः।**
**मेषः सिंहो धनुर्धारी राशयः क्षत्रियः स्मृताः ।।**
**वैश्या वृषमृगौ कन्या शुद्राः शेषाः प्रकीर्तिताः।**
**वर्णक्रमेण पूर्वादिग् दक्षिणे पश्चिमे तथा ।।**
**यो यस्य राशिर्मर्त्यस्य तस्य द्वारं ततश्चरेत्।**
**दिशि तद् विपरीतं तु कर्त्तुर्नेष्टफलं भवेत् ।।16।।**[1]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**वास्तुरत्नावली मतानुसारम् –**

**पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम्।**

**शुद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम् ॥**[2]

अर्थात् ब्राह्मणराशेः पूर्वद्वारं, क्षत्रियराशेः उत्तरद्वारं, वैश्यराशेः दक्षिणद्वारं, शुद्रराशेः पश्चिमद्वारं च शुभाय भवति।वृश्चिकमीनसिंहराश्युत्पन्नानां गृहस्वामीनां कृते पूर्वस्यां दिशि, कन्यामकरकर्कराश्युत्पन्नानां कृते दक्षिणस्यां दिशि, धनुतुलामिथुनराश्युत्पन्नानां कृते पश्चिमस्यां दिशि, कुम्भवृषमेषराश्युत्पन्नानाङ्कृते चोत्तरस्यां दिशि गृहस्य द्वारं शुभदायकं भवति।

वर्णभेदात् द्वारदिङ्गनिर्णये महान् भेदः दृश्यते। मुहूर्त्तचिन्तामणिकारेण तु अथ द्वारं द्विजवैश्यशुद्रनृपराशीनां हितं पूर्वतः इति एवम् उक्त्वा विप्रादि वर्णक्रमेण पूर्वादिदिक्षु द्वारः निर्धारितः अर्थात् पूर्वदिशि ब्राह्मणवर्णस्य, दक्षिणे क्षत्रियस्य, पश्चिमे वैश्यस्य, उत्तरे शुद्रस्य द्वारः निर्धारितम् किन्तु विश्वकर्मप्रकाशमते भिन्नता दृश्यते। यतोहि मुहूर्त्तचिन्तामणौ तु दक्षिणदिशि द्वारनिर्धारणम् वैश्यानां कृते उक्तं किन्तु अपरेशु ग्रन्थेषु दक्षिणदिशि क्षत्रियवर्णस्य द्वारः निर्मियते।

विश्वकर्म मतमेव अनुसरति असौ रामाचार्यः। शुद्रस्यापि द्वारनिर्धारणे भिन्नता नास्ति। यतो हि पश्चिमदिशि शुद्रस्य निर्धारणं विश्वकर्मा अपि वक्ति मुहूर्त्तचिन्तामणिकारः अपि अतः उभयोः भिन्नता तावत् ब्राह्मणक्षत्रियवर्णयोः द्वारनिर्धारण एव विद्यते। किन्तु वास्तुराजवल्लभे प्रायः वर्णाधारेण वर्णसम्मिश्रणं दृश्यते। ज्योतिर्निबन्धे अपि भिन्नं मतं प्राप्यते।

**ब्राह्मणादिवेश्मद्वाराणि –** अथ ब्राह्मणादिवर्णपरत्वेन द्वारनिवेशनमुच्यते – अथवेति। द्विजादितः ब्राह्मणादिवर्णविभागेन पश्चादित्यादिदिक्षु गृहद्वारं स्यात्। यथा ब्राह्मणस्य पश्चान्मुखं गृहद्वारं , क्षत्रियस्योदग्दिशि , वैश्यस्य पूर्वस्यां , शुद्रस्य यमे दक्षिणस्यामित्यर्थः।

**उक्तं च श्रीपतिना -**

**'ध्वजे प्रतीच्यां मुखमग्रजानामुदङ्मुखं भूमिभृतां च सिंहे।**

**विशो वृषे प्राग्वदनं गजे तु शूद्रस्य याम्यां न समामनन्ति'॥इति।**[3]

ध्वजाये ब्राह्मणवर्णेच पश्चिमद्वारं शुभं भवति , सिंहाय क्षत्रियवर्णे च उत्तरदिग्द्वारं शुभ भवति, बृषभाये वैश्यवर्णे च पूर्वद्वारं शुभं भवति एवञ्च गजाय शुद्राणां कृते च दक्षिणदिग्द्वारं शुभं स्यात्।

ब्राह्मणादिवर्णपरत्वेन द्वारनिर्धारणं विषये मतं वैभिन्नं न दृश्यते सर्वैः आचार्यैः ब्राह्मणादिचतुर्षु वर्णेषु क्रमेण ब्राह्मणस्य पश्चिमस्यां, क्षत्रियस्योत्तरस्यां, वैश्यस्य पूर्वस्यां, शुद्रस्य दक्षिणस्यां द्वारं शुभदायकं भवति।

**वर्णसम्बन्धात् स्पष्टार्थं द्वारचक्रम्**

| **वर्णः** | **ब्राह्मणः** | **क्षत्रियः** | **वैश्यः** | **शुद्रः** |
|---|---|---|---|---|
| **आय** | ध्वजः | सिंहः | वृषः | गजः |
| **द्वारदिशा** | पश्चिमः | उत्तरः | पूर्वः | दक्षिणः |

प्रागवस्थित्या तत्र पूजित एव परन्तु हरावपि दक्षिणस्यामभिपूजितः तो च गजे तौ गजसिंहयौ गज उत्तरस्यामपि प्रशस्तः स्वस्थाने किमुत। एते ध्वजसिंहगजाख्या आयः पश्चिमायामपि पूजिताः स्वस्थाने किमुत। वृष आयस्तु अन्यत्र पूर्वदक्षिणोत्तरदिक्षु न पूजितः किन्तु स्वावस्थित्या पश्चिमदिश्येव। ध्वजस्तु सर्वत्रैव पूजित इति।अन्यया रित्यान्ये आयाः यत्रावस्थिताः स्युस्तत्मुखादिक्षु द्वारासणि स्युरित्यर्थः। प्रत्यग्ध्वजे द्वसरमथोक्षिण पूर्व हराविपि स्याद् द्विरदे च चाम्याम् इति श्रीपत्युक्तेः।

वर्णाश्रितं दिङ्गनिर्धारणम् अपरे आयाश्रित दिङ्गनिर्धारणम् अभाषित् रामाचार्येण। तत्र यदि विचारयामश्चेत् ध्वजः सिंहः वृषः गजः आयेषु क्रमशः मुहूर्त्तचिन्तामणिकारः पश्चिमदिशि, उत्तरदिशि, पूर्वदिशि, दक्षिणदिशि च द्वारदिङ्गनिर्धारणं प्रशस्तं मनुते। अत्र काचित् विचिकित्सा अग्रे विद्यते। यत्र आयानुरोधेन द्वारस्य दिङ्गनिर्धारयति रामाचार्यः तत्र श्लोकेन इदम् अवगम्यते यत् यद्यपि पूर्वोक्तश्लोकवशात् ध्वजआये सर्वाः दिशः प्रशस्तः किन्तु ब्राह्मणवर्णः यदि गृहनिर्माणं करोति चेत् असौ ध्वजाये कर्तुं शक्यते। तत् प्रशस्तं तत्रापि पश्चिमदिशि द्वारस्य निर्धारणं यदि करोति चेत् तत् शुभप्रदं भवति। एवमेव वदति यत् सिंह आये यद्यपि पूर्वदक्षिणउत्तरदिक्षु द्वारस्य निर्धारणं शुभं किन्तु तत्रापि विशिष्य यदि क्षत्रियवर्णः गृहं निर्माति चेत् असौ उत्तरदिशि द्वारं कुर्यात् चेत् शुभफलप्रदम्। महेश्वरः मतम् असौ स्थापयति टीकाकारः गोविन्दः। किन्तु तत्रापि यदि विशिष्य शुद्रवर्णीय कश्चन जनः गृहनिर्माति चेत् असौ दक्षिणदिशि द्वारस्थापयेत् तर्हिः अतीव शुभफलं भवति।

**आय सम्बन्धात् स्पष्टार्थं द्वारचक्रम् -**

| **आयः** | ध्वजः | सिंहः | वृषः | शुद्रः |
|---|---|---|---|---|
| **द्वारदिशा** | सर्वदिशि | पूर्वः<br>दक्षिणः<br>उत्तरः | पश्चिमः | पूर्वः<br>दक्षिणः |

**द्वारवेधविचारः-** द्वारवेधः प्रयत्नेन वर्जनीयो भवति । द्वारस्य सम्मुखावस्थितं पङ्कमार्ग वृक्षकोणस्तम्भकूपजलनिर्गमान् परित्यजेत् । किन्तु द्वारोच्छाया– द्विगुणितां भूमि त्यक्त्वा वहिः स्थिताः एते दोषकारिणः न भवन्ति । द्वारवेधस्य फलमपि ग्रन्थे दृश्यते। मुख्यद्वारस्य स्वयमुद्घाटनं, स्वयं पिधानं, मानाधिक्यं, नीचं द्वारं, द्वारस्योपरि द्वारम्, कुब्जद्वारं, उदुम्बरेणातिपीडितं द्वारं, मध्यविपुलं मुरजानुकारं द्वारञ्च दोषपूर्णद्वाराणि भवन्ति ।

**मार्गतरुस्तम्भभ्रमपङ्कब्रह्मादिद्वारवेधफलानि -**

**अत्र प्रसङ्गाद् द्वारवेधफलानि लिख्यन्ते।**

**तत्र वराहः-** **'मार्गतरुकोणकूपस्तम्भभ्रमविरुद्धमशुभदं द्वारम्।**

**उच्छ्रायाद् द्विगुणितां भूमिं त्यक्त्वा न दोषाय' ॥इति।[4]**

भ्रमो जलनिर्गमप्रदेशः प्रणालिकेत्यर्थः। विद्धं सम्मुखावस्थितम्। अत्रोच्छ्रायो द्वारस्य गृह्यते।

**तथा च गर्गः –**

**द्वारोच्छ्रायाद् द्विगुणितां भूमिं त्यकत्वा बहिः स्थिताः। न दोषाय भवन्त्येव ॥ इति।**

**'रथ्याविद्धं द्वारं  नाशाय कुमारदोषदं तरुणा।**

**पङ्कद्वारे शोको व्ययोऽम्बुनिस्त्रविणि प्रोक्ताः ॥**

**कूपेनापस्मारो भवति विनासश्च देवताविद्धे'।**

**क्रमेण स्त्रीदोषः कुलनाशो ब्रह्मणोऽभिमुखे भवति।**[5]

' पङ्कविद्धं द्वारं पङ्कद्वारं यस्य द्वारस्याग्रतो निरन्तरं पङ्कस्तिष्ठति। देवताः सुरप्रतिमाः। नाशः स्वामिन एव। ब्रह्म वेध एकाशीतिपदचक्रस्थितब्रह्मवेधो गृह्यते।

**वास्तुराजवल्लभे –        पृष्ठतः  पार्श्वयोर्वापि न वेधं चिन्तयेद् बुधः।**

**प्रासादे वा गृहे वापि वेधमग्रे विनिर्दिर्शेत् ॥**[6]

**समराङ्गण सूत्रधारायाम् –रथ्याविद्धे भवेत् रोगो मरणं चत्वरेण च।**

**शृङ्गाटकेन वैधव्यं दुहितणां प्रजायते ॥**

**वाप्या कूपेन वा विद्धे स्यादतीसारतो भयम्।**

**कोणान्मृत्युभयं विद्याद् वृक्षो रोगभयं भवेत् ॥**

**स्तम्भेन म्रियते स्वामी भ्रमेणार्थे न तिष्ठति।**

**प्रणालिने महद् दुःखं महाभीतिर्महाकलिः॥**[7]

**बृहत्संहितायाम् –           उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः।**

**मानाधिके नृपभयं दस्युभयं व्यसनमेव नीचे च ॥**

**द्वारं द्वारस्योपरि यत्तन्न शिवाय सङ्कटं यच्च।**

**आव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति ॥**

**पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय।**

**बाह्यविनिते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा ॥79॥**[8]

गृहे स्थितद्वारस्य कपाटं स्वयमुद्घाटितो भवति तर्हिः उन्मादरोगः, स्वयमनावृत्तं भवति तर्हि कुलनाशः, प्रमाणादधिकं भवति तर्हि राजभयं, प्रमाणादल्पं भवति तर्हि चौरभयं शारीरिककष्टं च जायते। द्वारस्योपरिद्वरं शुभं न भवति। द्वारस्य पृथुत्वं प्रमाणादल्पमशुभकारकं, प्रमाणादधिकं, क्षुद्भयं, कुब्जं कुलनाशनं च करोति . द्वारस्य निकटे उदुम्बरवृक्षः गृहपतिं कष्टकरं, गृहेविनितंगृहपतेः मृत्युकरं, गृहात् बाह्यविनितं परदेशे निवासःदिग्भ्रान्तः चौरम् पीडाकारकं च भवति।

तस्मिन् वेधस्य शुभाशुभफलप्रसङ्गे असौ वराहस्य मतम् उपस्थापयति यत् द्वारस्य वेधः मार्गेण, वृक्षेण, स्तम्भेन, कूपेन इत्यादि एवं भवति। किन्तु यदि असौ वराहः वक्ति उच्छ्राया द्विगुणिता भूमिं यदि अस्ति चेत् तस्य द्वारः तत् वेधयोः मध्ये द्विगुणितां उच्छ्राया भूमेः अन्तरं विद्यते चेत् असौ वेधः न स्वीकर्त्तव्यः अर्थात् वेधस्य परिहारस्तु अयमेव यत् द्विगुणितम् उच्छ्रायान्तरं द्वार तद् वेधजन्यवस्तुनुः स्यात्। गर्गस्येव मतम् असौ उल्लेखितं यत् यदि गृहद्वारं मार्गेण विद्धः भवति तर्हि गृहेशस्य मृत्युकारकं, वृक्षेण कुमारदोषदं, पङ्केन शोकः, अम्बुनिः स्त्राविमीतः वेध सति अपव्ययः, कूपेन उन्मादरोगस्योत्पत्तिः, देवताविद्धे सति गृहेशस्य मृत्युः, स्तम्भेन स्त्रीदोषः, ब्रह्मणोऽभिमुखे कुलनाशकारकञ्च भवति इति गर्गस्य मतम् असौ उल्लेखः।

यदि तोलनकुर्मश्चेत् पीयूषधाराकारस्य अन्येन आचार्येण सह तर्हिः असौ समराङ्गण सूत्रधाराकारः राजोपि तथैव अवादित् यत् मार्गवेधात् रोगः एवं श्रृगाटक वेधात् पुत्री वैधव्यं, कूपवेधात् अतिसाररोगः, कोणवेधात् मृत्युभयं, वृक्षवेधात् रोगः, स्तम्भवेधात् स्वामीमरणम्, चत्वरेण अर्थहानिः भवति इति असौ समराङ्गण सूत्रधारः वदति।

वास्तुराजवल्लभकारोऽपि वक्ति यत् द्वारवेधः न शुभावः किन्तु तत् विशिष्टम् असौ वक्ति यत् यदि राजमार्गाः अस्तिचेत् राजमार्गात् वेधः न भवति। एवमेव वास्तुनः पृष्ठे पार्श्वे वा यदि वेधजन्यानि वस्तुनि स्युः चेत् वेधः न भवति। असौ वास्तुराजवल्लभकारः वक्ति यत् पृष्ठतः पार्श्वयोः वा यदि वेधम् अस्ति चेत् तत् वेधं न स्वीकरणीयम्। प्रसादे वा गृहे वापि वेधमग्रे विनिर्दिशेत् अर्थात् यदि अग्रे भवति चेत् तदा एव तद् गृहं विद्धं भवति अन्यथा विद्धं न भवति।

**द्वारस्थाननियमाः यदाह विश्वकर्माः -**

**गृहमध्ये कृतं द्वारं द्रव्यधान्य विनाशनम्।**
**अवस्तु कलहं शोकं नार्यावासं प्रदूषयेत् ॥85॥**[9]

अनेन सह असौ पुनः इदम् अपि वदति यत् वास्तुमध्यं द्वाराणि न निवेशयेत् भरद्वाजः मतम् उल्लेखयति असौ गोविन्दः अनेन सह असौ अपवादम् अपि स्थापयति तस्मिन् क्रमे असौ विश्वकर्मणः उद्धरति यत् देवागारे विहारे प्रपायां मण्डपे, प्रतोल्ये, मुखे वास्तुर्मध्ये द्वारं भवितुमर्हति। प्रपायां एतेषु स्थलेषु वाप्यादिषु मध्ये मण्डपेषु च मध्येद्वारस्य स्थापनं भवितुमर्हति।

**सफलद्वारचक्रकथनम्**

**सूर्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः क्रमेण -**
**र्नागैरूद्वसनं ततो गजमितैः शाखासु सौख्यं भवेत्।**
**देहल्यां गुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः**
**सौख्यं चक्रमिदं विलोक्य सुधिया द्वारं विधेयं शुभम्।29॥**[10]

सूर्यर्क्षादिति। अत्र द्वारस्य चत्वारः पाषाणा आवश्यकाः। द्वौ ऊर्ध्वाधोभावेनावस्थितौ समावल्पपरिमाणौ। भाषया उत्तारङ्ग इत्युर्ध्वावस्थितस्य सञ्ज्ञा। अधोवस्थितस्य तु देहलीति सर्वसाधारणं नाम। द्वौ पार्श्वद्वये स्थितो महापरिमाणौ उच्चत्वेन साह इति भाषाय द्वयोरपि सञ्ज्ञा।

**द्वारचक्रानुसारेण फलानि -**

तत्र द्वारे चिकीर्षिते सूर्याधिष्ठितनक्षत्राद्युगभैश्चतुर्भिर्नक्षत्रैः शिरस्यवस्थितैः सद्भिः लक्ष्मीप्राप्तिरूपं फलं स्यात्। ततस्तदग्रिमैर्गजमितैरष्टभिर्भैः शाखासु भाषाया साहर इति नाम, तत्रावस्थितैर्गृहस्वामिनः सौख्यरुपं फलंस्यात्। ततस्तदग्रिमैर्गुणैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहपतेर्मृतिः स्यात्। ततस्तदाग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्यस्वरूपेऽवकाशे स्थितैः सौख्यं स्यात्।

**तदुक्तं ज्योतिर्निबन्धे -**

**द्वारचक्रं प्रवक्ष्यामि भाषितं विश्वकर्मणा।**
**सूर्यभाद् भचतुष्कं तु शिरस्योपरि विन्यसेत् ॥**
**द्वे द्वे कोणे प्रदातव्ये शाखायुग्मे द्वयं द्वयम्।**
**अधश्च त्रीणि देयानि वेदा मध्ये प्रतिष्ठिताः॥**
**राज्यं स्यादूर्ध्वनक्षत्रे कोणेषूद्वासनं भवेत्।**
**शाखायां लभते लक्ष्मीमधश्चैव मृतिं लभेत्॥**
**मध्यमेषु लभेत् सौख्यं चिन्तनीयं सदा बुधैः ॥**
**द्वरचक्रमिदं प्रोक्तं द्वारनिर्माणहेतवे ॥**[11]

इदानिं ब्रह्मणा द्वारचक्रस्य विषये यत् पूर्वम् उक्तं तदहं वदामि। यस्मिन् नक्षत्रे सूर्य भवति ततः चत्वारि नक्षत्राणि द्वारस्य उपरि स्थापनीया पुनः द्वयं द्वयं नक्षत्रं द्वारस्य कोणे स्थापनीयम्।

यदि सूर्यनक्षत्रतः गणनाद्वारा द्वारस्थापनं नक्षत्रद्वारस्योपरि भवति तर्हि तत्र गृहस्वामीनः उन्नतिः भवति।

प्रधानद्वारस्य स्थापनार्थं शुभनक्षत्रस्य चयनपुरस्सरं सूर्यनक्षत्रतः चन्द्रनक्षत्रपर्यन्तं गणनां कृत्वा द्वारशुद्धि चक्रं द्रष्टव्यम्। एतस्य तात्पर्यं तु सूर्यः यस्मिन् नक्षत्रे भवति अभीष्टचन्द्रनक्षत्रपर्यन्तं (दिन नक्षत्रम् ) ततः गणनीयम्। प्रथम नक्षत्र चतुष्टयं शुभ तथा ततः अष्टमनक्षत्रपर्यन्तम् अशुभः। ततः अष्टमनक्षत्रपर्यन्तं शुभः ततः नक्षत्रत्रयम् शुभः अन्ते नक्षत्रचतुष्टयम् अशुभः भवन्ति। नक्षत्रं गणनायाम् प्रथमतः चत्वारि पर्यन्तं तथा त्रयोदशतः विंशतिपर्यन्तं तथा चतुर्विंशतितः सप्तविंशतिपर्यन्तं भवति। तस्य एव ग्रहणं भवति। यथा यदि अश्विनी नक्षत्रे सूर्यः भवति तर्हि अश्विनी, भरणी, कृतिका, रोहिणी, हस्ता, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूला, पूषा, शतभिषा, पूर्वभाद्रपद, तथा रेवती शुभःभवति।

**॥द्वारचक्रम् ॥**

| **सूर्यनक्षत्रतः नक्षत्रसंख्या** | 4 (1-4) | 8 (5-12) | 8 (13-20) | 3 (21- 23) | 4 (24 - 27) |
|---|---|---|---|---|---|
| **द्वारचक्रे स्थानम्** | शिरसि | केणेषु | शाखासु | देहल्याम् | मध्यभागे |
| **फलम्** | लक्ष्मीप्राप्तिः | उच्चाटनम् | सुखप्राप्तिः | मृत्युः | सुखप्राप्तिः |

**बृहद्वास्तुमालायाम् – द्वारस्थापननक्षत्राम्युच्यन्तेऽअस्विनि चोत्तराः।**

**स्वातौ पूष्णि च रोहिण्यां द्वारशाखावरोपणम् ॥138॥**[12]

**द्वारस्थापने तिथि फलं चक्रम्**

| तिथिः | फलम् |
|---|---|
| प्रतिपदा | दुःखकारकः |
| द्वितिया | द्रव्यहानिः |
| तृतीया | रोगप्रदः |
| चतुर्थी | कार्यहानिः |
| पञ्चमी | धनदायकः |
| षष्ठी | कुलक्षयः |
| सप्तमी | अशुभः |
| अष्टमी | अशुभः |
| नवमी | अशुभः |
| दशमी | धनदायकः |
| एकादशी | शुभः |
| द्वादशी | शुभः |
| त्रयोदशी | शुभः |
| चतुर्दशी | अशुभः |
| पूर्णिमा | शुभः |
| अमावास्या | विरोधकारकः |

द्वारं कस्मिन् नक्षत्रे स्थापयेत् यत् शुभं फलं जनयेत्। तदर्थम् अपि विचारः कृतः विद्यते मुहूर्तचिन्तामणौ। रामाचार्यः वक्ति यत् द्वारस्थापनकाले सूर्यः यस्मिन् नक्षत्रे स्थितः स्यात् तस्मात् नक्षत्रात् आरभ्य चत्वारि नक्षत्राणि शिरसि स्थापनीयानि कुत्र शिरसि अर्थात् एकं द्वारं कल्पयित्वा तस्मिन् द्वारे शिरसि उपरि चत्वारि नक्षत्राणि सूर्यनक्षत्रात् आरभ्य स्थापयेत्। एतानि चत्वारि नक्षत्राणि शुभप्रदानि भवन्ति अतएव वदति सूर्यर्क्षाद्शिरसियुगभः। तेषु अष्टसु नक्षत्रेषु यदि द्वारस्थापन क्रियते चेत् अशुभफलं भवति उद्वासनं इति वदति असौ उद्वसनं ततः अष्टौ नक्षत्राणि पार्श्वयोः स्थाप्यानि एतेषु नक्षत्रेषु यदि द्वारस्थापनं विधियते चेत् शुभफलं भवति। एवमेव देहल्यां त्रीणि नक्षत्राणि ततः अग्रीमानि भवन्ति एतेषु यदि द्वारस्थापनं भवति चेत् अशुभफलं जनयति । पुनः मध्यस्थितैः चतुर्भिः नक्षत्रैः अन्तिम चतुर्षु नक्षत्रेषु अन्यतमे कस्मिन् चित् नक्षत्रे यदि द्वारस्थापनं भवति चेत् ततः द्वारस्यमध्यस्थितः येषु नक्षत्रेषु स्वीक्रियते एवं तत् शुभावहं भवति सौख्यं जनयति च। अत्र असौ ज्योतिर्निबन्धस्य मतम् अपि स्थापयति ज्योतिर्निबन्धौक्तमतं वस्तुतः विश्वकर्मणः मतम् एव विद्यते ।

पीयूषधाराकारेण गोविन्ददैवज्ञेन द्वारस्थापने विहितानां नक्षत्राणां तिथीनां च वर्णनं कृतं विद्यते। इदं मुहूर्त्तचिन्तामणिकार मतात् भिन्नं विशिष्टं च विद्यते। ज्योतिर्निबन्धस्य मतं प्रास्तौत् तत् अनुसारेण अश्विनी, उत्तरात्रयः, हस्तः,पुष्यः,श्रवणः, मृगशिरा, स्वाती, पुषा, रोहिणि एतानि नक्षत्राणि शुभानि भवन्ति द्वारस्थापनाय। यदि विश्वकर्मप्रकाशेन सह अन्येषां ग्रन्थानां विषयान् तोलयाम चेत् तत्र क्वचित् तु विश्वकर्मप्रकाशेन सह मुहूर्त्तमुक्तावलि मतं संगच्छते क्वचित् च बृहत्वास्तुमालाकारेण सह अस्य मतेक्यं दृश्यते। यथा विश्वकर्मप्रकाशे, रेवती, अथच पुष्यः, हस्तः,अश्विनी एतानि नक्षत्राणि शुभावहानि उक्तानि तथैव मुहूर्त्तमुक्तावल्यामपि एतानि शुभप्रदानि उक्तानि। तथैव बृहत्वास्तुमालायाः सह यत् साम्यं तत्र अश्विनी नक्षत्रं बृहत्वास्तुमालाकारेणापि स्वीकृतं विद्यते यथा विश्वकर्मणा उक्तं एवमेव स्वाती, रोहिणी नक्षत्रम् उभयत्र स्वीक्रियते। अनेन कानिचन नक्षत्राणि यथा अश्विनी, रोहिणी, स्वाती, पुष्यः एतानि प्रायः तथा नक्षत्राणि सन्ति यानि सर्वैः स्वीकृतानि सन्ति।

द्वारस्थापनाय काः तिथयः शुभप्रदाः काः च अशुभप्रदा इत्यस्मिन् विषये यद्यपि रामाचार्यः न किमपि वक्ति किन्तु पीयूषधाराकारः गोविन्दः ज्योतिर्निबन्धोक्तमतम् एव उपस्थापयति तदनुसारेण पञ्चमी शुभदा भवति यतोहि इयं धनं यच्छति। एवमेव सप्तम्यां, नवम्याम् एवं अष्टम्यां च यदा द्वारस्थापनं विधियते चेत् इदं शुभफलप्रदं भवति इति गोविन्देन ज्योतिर्निबन्धोक्त मतम् उक्त्वा विस्तरेण द्वारस्थापनाय शुभाशुभ तिथीनाम् उल्लेखः कृतः।

**दिशानुसारं मुख्यद्वारचयनम्**

**अनिलभयं स्त्रीजननं प्रभूतधनता नरेन्द्रवाल्लभ्यम् ।**

**क्रोधपरतानृतत्वं क्रौर्य चौर्यञ्च पूर्वेण ॥163॥**

गृहभित्तेः नवभागे कृते प्रतिभित्ति अष्टद्वाराणि भवन्ति। पूर्वदिशि अष्टद्वाराणां फलम् – शिखिद्वारं वायुभयम्, द्वितीयात् पर्जन्यद्वारात् कन्यालाभः, तृतीयात् जयन्तद्वारात् धनलाभः, चतुर्थात् इन्द्रद्वारात् राजप्रियता, पञ्चमात् सूर्यद्वारात् क्रोधाधिक्यं, षष्ठात् सत्यद्वारात् वञ्चना, सप्तमात् भृशद्वारात् क्रूरता, अष्टमात् अन्तरिक्षद्वारात् चोर– भयं च भवति ।

**अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतवृद्धिः ।**

**रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन ॥164॥**

दक्षिणदिशि प्रथमादनिलद्वारात् पुत्रन्यूनता, द्वितीयात् पौष्णद्वारात् दासवृत्तिः, तृतीयात् वितथद्वारात् नीचता, चतुर्थबृहत्क्षतद्वारात् भक्ष्यपानम् पुत्रवृद्धिश्च, पञ्चमयाम्यद्वारात् अशुभम्, षष्ठगान्धर्वद्वारात् कृतघ्नता, सप्तमात् भृङ्गराजद्वारात् धनहीनता, अष्टमात् मृगद्वारात् बलनाशश्च भवति ।

**सुतपीडा रिपुवृद्धिर्न सुतधनाप्तिः सुतार्थफलसम्पत् ।**

**धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे ॥ 165॥**

पश्चिमदिशि अष्टद्वाराणां फलानि – प्रथमात् पितृद्वारात् पुत्रकष्टम्, द्वितीयात् दौवारिकद्वारात् शत्रुवृद्धिः, तृतीयात् सुग्रीवद्वारात् धनपुत्रहानिः, चतुर्थकुसुमदन्तद्वारात् पुत्रधनप्राप्तिः, पञ्चमवरुणद्वारात् धनसम्पत्तिप्राप्तिः, षष्ठात् असुरद्वारात् राजभयम्, सप्तमात् शोषद्वारात् धननाशः, अष्टमात् पापयक्ष्मद्वारात् रोगभयञ्च भवति।

**वधबन्धो रिपुवृद्धिः सुतधनलाभः समस्तगुणसम्पत् ।**

**पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैःस्वम् ॥166॥**

उत्तरदिशि अष्टद्वाराणां फलानि - प्रथमात् रोगद्वारात् वधबन्धनम्, द्वितीयात् सार्पद्वारात् रिपुवृद्धिः, तृतीयात् मुख्यद्वारात् पुत्रधनलाभः, चतुर्थात् भल्लाटद्वारात् सद्गुणसम्पत्तिः, पञ्चमात् सौम्यद्वारात् पुत्रधनलाभः, षष्ठात् भुजङ्गद्वारात् पुत्रवैरम्, सप्तमात् आदित्यद्वारात् स्त्रीजन्मदोषः, अष्टमात् दितिद्वारात् निर्धनता भवति ।

**आयानुसारं मुख्यद्वारचयनम्**

**सर्वद्वार इहध्वजो वरुणदिग्द्वारं च हित्वा हरिः ।**

**प्राग्द्वारो वृषभो गजो यम सुरेशाशामुखः स्याच्छुभः ॥150॥**[13]

पूर्ववर्णितध्वजायः सर्वासु दिक्षु शुभः । सिंहायवतां पश्चिमान्यत् द्वारं शुभम्। वृषायवतां पूर्वद्वारं, गजायवतां च दक्षिणपूर्वद्वारे शुभे भवतः ।

**ध्वजे प्रतीच्यां मुखमग्रजानामुदङ्मुखं भूमिभृतां च सिंहे ।**

**विशो वृषे प्राग्वदनं गजे तु शूद्रस्य याम्यां हि समामनन्ति ॥**[14]

ध्वजाये ब्राह्मणवर्णे च सिंहाये क्षत्रवर्णे च उत्तरे वृषाये वैश्य- वर्णे च पूर्वस्मिन्, गजाये शूद्रजातौ च दक्षिणे द्वारं शुभं भवति ।

**पूर्वादौ त्रिषडर्थपञ्चमलवेद्वाः सव्यतोङ्कौद्धते ।**

**दैर्घ्ये द्वयंशसमुच्छ्रिताब्धिलवके सर्वासु दिक्षुदिता ॥**[15]

गृहस्य दैर्ध्यविस्तारयोगं नवभिर्भाजयित्वा पूर्वद्वारे करणीये वामतः द्वयंशमितां भूमिं त्यक्त्वा तृतीयतुरीयांशे दक्षिणमुखद्वारे करणीये चतुर्थपञ्चमभागे उत्तरमुखे द्वारे करणीये चतुर्थपञ्चमांशे एव द्वारं निर्मातव्यम्।

1.1. **देवतानुसारं द्वारचयनम्-** गृहं नवभागं कृत्वा पञ्चभागं दक्षिणे त्रिभागं वामतः कृत्वा शेषं द्वारं प्रकल्पयेत्। देवालये विहारे मण्डपे प्रतोल्यां मखे च द्वारं मध्ये निवेशयेत्। गृहे च मध्यद्वारप्रकल्पनमशुभं भवति। ग्रन्थे द्वारफलानि विजृम्भितानि सन्ति।(1) वास्तुचक्रस्य चतसृषु दिशु द्वात्रिंशद्देवाः विद्यन्ते। कस्य देवस्य स्थाने मुख्यद्वारनिर्माणेन किं किं शुभाशुभफलं प्राप्यते तदेवात्र प्रतिपाद्यते । यथा-

पूर्वस्यां दिशि-

1. शिखी - स्थानेऽस्मिन्मुख्यद्वारनिर्माणेन दुःखहान्यग्निभयानि प्राप्यन्ते।
2. पर्जन्यः-स्थानेऽस्मिन् भवनस्य मुख्यद्वारनिर्माणेन परिवारे कन्यानां वृद्धिः, दारिद्र्यं, शोकश्च जायन्ते।
3. जयन्तः- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धनं प्राप्यते ।
4. इन्द्रः- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन राजसम्मानः प्राप्यते ।
5. सूर्यः - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धनं प्राप्यते ।

6. सत्यम्- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन चौरभयं, कन्यानां जन्म, असत्यभाषिणामाधिक्यञ्च जायते ।

7.भृश: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन क्रूरतातिक्रोधपुत्रहीनताश्च जायते ।

8. अन्तरिक्ष: - स्थानेऽस्मिन् द्वारनिर्माणेन चौरभयं हानिश्च जायेते ।

दक्षिणस्यां दिशि-

9. अनिल:- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन सन्तानन्यूनत्वं तथा मृत्युर्जायते ।

10. पूषा- स्थानेऽस्मिन्मुख्यद्वारनिर्माणेन दासत्वबन्धनयो: प्राप्तिर्भवति ।

11. वितथ:- स्थानेऽस्मिन् मुख्यमार्गनिर्माणेन नीचत्वं भयप्राप्तिश्च जायेते।

12. बृहत्क्षत: - स्थानेऽस्मिन् मुख्यमार्गनिर्माणेन धनप्राप्ति: पुत्रप्राप्तिश्च सञ्जायेते ।

13. यम: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धनवृद्धिर्जायते । परन्तु अत्र भयमपि उत्पद्यते इति मतान्तरं प्राप्यते ।

14. गन्धर्व: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन निर्भयता यश: प्राप्तिश्च जायेते । परन्तु कृतघ्नता लभ्यते इति मतान्तरमपि प्राप्यते ।

15. भृङ्गराज: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन निर्धनता, चौरभयं, व्याधिभयञ्च जायन्ते ।

16. मृग: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन पुत्रबलानां विनाशो भवति। निर्बलता रोगभयञ्चोत्पद्येते ।

पश्चिमायां दिशि -

17. पिता- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन पुत्रहानि:, निर्धनता, शत्रूणां वृद्धिश्च जायन्ते ।

18. दौवारिक: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन स्त्रीदु:खं शत्रुवृद्धिश्च जायेते ।

19. सुग्रीव: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन लक्ष्मीप्राप्तिर्भवति ।

20. पुष्पदन्त: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन पुत्र: धनञ्च प्राप्येते।

21. वरुण: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धनं सौभाग्यञ्च प्राप्येते।

22. असुर: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन राजभयेन सह दुर्भाग्य- मपि प्राप्यते । परन्तु अत्र धनं लभ्यते इति मातान्तमपि दृश्यते ।

23. शोष: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धननाश: दु:खप्राप्तिश्च भवत: ।

24. पापयक्ष्मा - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन रोगशोकादीनि लभ्यन्ते ।

उत्तरस्यां दिशि-

25. नाग: - स्थानेऽस्मिन् द्वारनिर्माणेन शत्रुवृद्धिनिर्बलतादु:खानि प्राप्यन्ते स्त्रीदोषश्च जायते ।

26. रोग: - स्थानेऽस्मिन् द्वारनिर्माणेन मृत्यु:, बन्धनं, स्त्रीहानि:, शत्रुवृद्धि: च भवन्ति । । निर्धतना प्राप्यते च ।

27. मुख्य: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन हानिर्भवति । परन्तु अत्र पुत्रधनादीनि लभ्यन्ते इति मतान्तरमपि परिदृश्यते ।

28. भल्लाट:- स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन धनधान्यसम्पत्तय: प्राप्यन्ते ।

29. सोम: - स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन पुत्रधनसुखादीनि प्राप्यन्ते।

30. भुजग: – स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन पुत्रै: साकं शत्रुता भवति दु:खानि च प्राप्यन्ते । परन्तु अत्र सुखसम्पत्त्यादीनां वृद्धिर्भवति इति मतान्तरमपि अस्ति ।

31. अदिति:– स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन स्त्रीषु दोष: जायते, शत्रुभयं शोकप्राप्तिश्च भवत:।

32. दिति: – स्थानेऽस्मिन् मुख्यद्वारनिर्माणेन निर्धनतारोगदु:खविघ्नानि प्राप्यन्ते ।

**सन्दर्भग्रन्थसूची**


1. वशिष्ठसंहिता, डा. गिरिजाशङ्करशास्त्री,ज्योतिषकर्मकाण्डआध्यात्म शोध संस्थान, प्रयाग, सं–2006
2. मुहूर्त्तचिन्तामणि:, डा.रामचन्द्रपाठक:,चौखम्वा सरभारती प्रकाशन,वारणासी, संस्करणम्–2006
3. वैदिकज्योतिष, गिरिजाशंकरशास्त्री,चौखम्बा सुरभारती प्रकाशन,वाराणासी, संस्करणम्–2007
4. वृहतपराशरहोराशास्त्रम्,पं देवचन्द्रझा,चौखम्बा सुरभारती प्रकाशन, वाराणासी, संस्करणम्–2000
5. ज्योतिष शास्त्रसेतिहास, आचार्य लोकमणिदाहल:,चौखम्बा सुरभारती प्रकाशन, वाराणासी, सं–2009
6. मुहूर्तचिन्तामणि:, श्री विन्ध्येश्वरीप्रसादद्विवेदी,चौखम्बा सुरभारती प्रकाशन, वाराणासी, संस्करणम्–2011
7. फलित दर्पण, राधेश्याम शर्मा, भारतीय पुस्तक मन्दीर, हरिद्वार : 2008
8. वास्तुप्रबोधिनी, डॉ.अशोकथपलियाल, अमर ग्रन्थ पब्लिकेशन्स, दिल्ली, संस्करण – 2011
9. भारतीय वास्तुशास्त्र परिचय–पाठ्यक्रम, सम्पादक–प्रो.वेम्पटिकुटुम्बशास्त्री,रा.सं.सं. नईदिल्ली, सं.2007
10. वास्तु चिन्तामणि, प्रो.आर्यभूषणशुक्ल, भारतीय ज्योतिष विज्ञान परिषद्, नोडया, उ.प्र. सं.2022


**सन्दर्भसूची**


1. श्रीविश्वकर्मप्रकाश:,सप्तमोऽध्याय:श्लो.सं14–16
2. वास्तुरत्नावली,भूपरिग्रहाध्याय:,श्लो.सं16
3. उद्धतंमु.चि,पीयूषधाराटीका,वास्तुप्रकरणम्, श्लो.सं.5
4.उद्धतं,मु.चि,पीयूषधाराटीका,वास्तुप्रकरणम्, श्लो.सं.17
5. उद्धतं,मु.चि,पीयूषधाराटीका,वास्तुप्रकरणम्, श्लो.सं.17
6. वास्तुसर्वस्व,गृहद्वार,पृ.सं.123
7. वास्तुसर्वस्व,गृहद्वार,पृ.सं.123
8. वृ.सं.वास्तुविद्या,श्लो.सं.79
9. श्रीविश्वकर्मप्रकाश:,सप्तमोऽध्याय:,श्लो.सं.85
10.मु.चि,पीयूषधाराटीका,वास्तुप्रकरणम्, श्लो.सं.29
11. उद्धतं,मु.चि,पीयूषधाराटीका,वास्तुप्रकरणम्, श्लो.सं.29
12. बृहद्वास्तुमालायाम्,द्वारस्थापनविचार:,श्लो.सं.138
13.बृहद्वास्तुमाला,श्लो.सं–151
14.बृहद्वास्तुमाला,श्लो.सं–152
15.बृहद्वास्तुमाला,श्लो.सं–153